International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(4): 165-167
© 2021 IJSR
www.anantaajournal.com
Received: 13-05-2021
Accepted: 15-06-2021

**डाँ. शशिभूषणमिश्रः**
(एम्. ए., पि.एच्.डि., डि.लिट्.)
राष्ट्रपतिपुरस्कृत: वरिष्ठसहायकाचार्य:
श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालय:
७/२ ए, पि. डब्ल्यु. डि. रोड्
कोलकाता, भारत

Corresponding Author:
**डाँ. शशिभूषणमिश्रः**
(एम्. ए., पि.एच्.डि., डि.लिट्.)
राष्ट्रपतिपुरस्कृत: वरिष्ठसहायकाचार्य:
श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालय:
७/२ ए, पि. डब्ल्यु. डि. रोड्
कोलकाता, भारत

# धार्मिकव्याकरणम्

**डाँ. शशिभूषणमिश्रः**

**उपक्रमः** व्याकरणनामेयमपरा विद्या। वेदादेवास्योत्पत्तिरभवत्। भारतीयपरम्परानुसारेण धर्मार्थकाममोक्षाख्य-पुरुषार्थचतुष्टयसिद्धये वेदानामध्ययनमावश्यकम्। कारणं वेदाध्ययनं मानवमात्रस्याधिकार:। वेदवाण्या सर्वेषां कल्याणं भवति। उक्तञ्च यजुर्वेदे –

> यथेमां वाचं कल्याणीमावदानि जनेभ्य:। ब्रह्मराजन्याभ्यां शुद्राय चार्याय च स्वाय चारणाय च। प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे काम: समृध्यतामुप मादो नमतु।। (यजुर्वेद:, २६/२)

वेदमूलकत्वात्सर्वेषां कृते व्याकरणस्याध्ययनं कर्त्तव्यमिति। महाभाष्ये यथा-

> ब्राह्मणेन निष्कारणो धर्म: षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति। (पस्पशा.)

इदं तु वेदाङ्गम्। षट्ष्वङ्गेषु सकलशास्त्रेषु च व्याकरणं तथा अस्याराधकत्वात् वैयाकरणा: मुख्या: सन्ति। अत: एतदर्थं परम्परायां कथ्यते -
(क) आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तप:।
प्रथमं छन्दसामङ्गमाहुर्व्याकरणं बुधा:।। (वाक्यपदीयम्, १/११)
(ख) प्रधानं च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्न: फलवान् भवति। (पस्पशाह्निकम्)
(ग) सर्वार्थानां व्याकरणाद्वैयाकरण उच्यते।
तन्मूलतो व्याकरणं व्याकरोतीति तत्तथा।। (महाभारतम्, उद्योगपर्व, ४३/६१, गीताप्रेस्-संस्करणम्)
(घ) प्रथमे हि विद्वांसो वैयाकरणा:, व्याकरणमूलत्वात् सर्वविद्यानाम्। (ध्वन्यालोक:, प्रथमोद्यते)
वेदपुरुषस्य मुखं खलु इदम्। सन्दर्भेऽस्मिन्पाणिनीयशिक्षा (पा.शि.४१-४२) वदति -
छन्द: पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते। ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।
शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्। तस्मात्सङ्गमधीत्येव ब्रह्मलोके महीयते।।
अनेन प्रकारेण व्याकरणेन धर्मार्जनं भवतीति निश्चप्रचम्। परन्तु धर्मदृष्ट्या अस्य व्याकरणस्य केन प्रकारेण विभाजनं स्यादस्मिन्विषये इह समासेन आलोच्यते ।

**धर्मदृष्ट्या विभाजनम्:** संस्कृतव्याकरणस्य धर्मदृष्ट्या द्विप्रकारकविभाजनं कुर्यात्। यथा - (क) विविधधर्माश्रितजनै: रचितं संस्कृतव्याकरणं तथा (ख) धर्मार्जनार्थं रचितं संस्कृतव्याकरणम्। तद्यथा –

**(क) विविधधर्माश्रितजनै: रचितं संस्कृतव्याकरणम्:** प्रथमत: संस्कृतव्याकरणस्य विकाशे विविधधर्माश्रितवैयाकरणानां योगदानं विद्यते। अस्य संस्कृतव्याकरणस्य विकाशार्थं न केवलं हिन्दुवैयाकरणा: योगदानं दत्तवन्त:, अपितु जैनवैयाकरणा:, बौद्धवैयाकरणा:, ख्रीष्टधर्माश्रितवैयाकरणा:, तथा यावनिकवैयाकरणा: तथा अन्येऽपि वैयाकरणा: स्वकीयामूल्ययोगदानं दत्तवन्त:।

हिन्दुवैयाकरणेषु परम्परास्रष्टारः 'अष्टाध्यायी'कर्त्ता 'पाणिनिः', 'वार्त्तिक'कारः 'कात्यायनः', 'महाभाष्य'कारः 'पतञ्जलिः', 'सिद्धान्तकौमुद्या'दिग्रन्थकर्त्ता 'भट्टोजिदीक्षितः', 'लघुशब्देन्दुशेखर'ादिग्रन्थकर्त्ता 'नागेशः', 'प्रदीप'कर्त्ता 'कैयटः', 'शाकटायनव्याकरण'कर्त्ता 'शाकटायनः' तथा एतादृशाः अन्येऽपि प्रसिद्धाः वैयाकरणाः दृश्यन्ते।

तेनैव प्रकारेण जैनवैयाकरणेषु 'हैमशब्दानुशासन'स्य कर्त्ता 'हेमचन्द्रः', 'जैनेन्द्रव्याकरण'कारः 'देवनन्दी', कातन्त्रस्य 'चतुष्कव्यवहारढुण्ढिका'व्याख्यायाः स्रष्टा 'धनप्रभसूरिः', कातन्त्रव्याकरणस्य 'दुर्गप्रबोध'टीकायाः कर्त्ता 'जिनप्रबोधसूरिः', कातन्त्रव्याकरणस्य दुर्गपदप्रबोधटीकायाः 'दुर्गपदप्रबोधः' इति व्याख्याकर्त्ता 'प्रबोधमूर्त्तिगणिः', 'उणादिवृत्तेः' कर्त्ता 'क्षपणकः' (अपरनाम 'सिद्धसेनदिवाकरः'), जैनेन्द्रव्याकरणस्य 'महावृत्तेः' स्रष्टा 'अभयनन्दी', 'शब्दार्णवः' इति जैनेन्द्रव्याकरणस्य दाक्षिणात्यसंस्करणस्य संस्कर्त्ता 'गुणनन्दी', शब्दार्णवस्य व्याख्याता 'सोमदेवसूरिः', 'जैनशाकटायनव्याकरण'स्य तथा तस्योपरि 'अमोघा' इति वृत्तेः कर्त्ता 'पाल्यकीर्त्तिः' 'रूपसिद्धिरि'ति लघुप्रक्रियाग्रन्थस्य कर्त्ता 'दयालपालमुनिः', 'बुद्धिसागर'स्य (अपरनाम 'पञ्चग्रन्थी') स्रष्टा श्वेताम्बरसम्प्रदायस्य आचार्यः 'बुद्धिसागरसूरिः', 'दीपक'व्याकरणस्य स्रष्टा 'भद्रेश्वरसूरिः', 'शब्दानुशासन'स्य कर्त्ता 'मलयगिरिः' तथा एतादृशाः अन्येऽपि प्रसिद्धाः वैयाकरणाः भवन्ति।

बौद्धवैयाकरणेषु 'धातुप्रदीप'स्य कर्त्ता 'मैत्रेयरक्षितः', 'न्यास'कारः 'जिनेन्द्रबुद्धिः', 'रूपावतार'स्य कर्त्ता 'धर्मकीर्त्तिः', 'ऐन्द्रव्याकरण'स्य कर्त्ता 'इन्द्रगोमी', 'चान्द्रव्याकरण'स्य कर्त्ता 'चन्द्रगोमी', 'काशिका'कारौ 'जयादित्य'-'वामनौ', पाणिनेर्भाषासूत्राणि अधिकृत्य 'भाषावृत्ति'विधायकः 'पुरुषोत्तमदेवः', 'दुर्घटवृत्ति'कारः 'शरणदेवः', 'भागवृत्तिकारः' 'विमलमतिः', 'लिङ्गानुशासन'-स्य कर्ता 'वामनः', 'तन्त्रप्रदीप'कारो 'मैत्रेयरक्षितः', चान्द्रसूत्रस्य 'बालबोधिनी' इति वृत्तेः कर्त्ता 'कश्यपभिक्षु' इति तथा अन्ये च एतादृशाः पण्डिताः प्रसिद्धाः सन्ति।

ख्रिष्टधर्माश्रितवैयाकरणेषु महाभाष्यस्य आङ्गलव्याख्यानस्य कर्त्ता 'रुड्वर्गन्'महोदयः, महाभाष्यस्य संस्कर्तरौ 'कीलहार्न','कार्डोना' च, लघुसिद्धान्तकौमुद्याः आङ्गलव्याख्याकारः 'बालेण्टाइन्'- महोदयः, 'पाणिनि' इति पुस्तकस्य कर्त्ता 'थिओडर-गोल्डष्टुकर'महोदयः, विविधशोधपूर्णप्रबन्धस्य कर्त्ता 'जान्-हुवेन्'महोदयः, व्याकरणस्योपरि विविधशोधपूर्णग्रन्थस्य कर्त्ता 'पाउल्-किपार्स्कि'महोदयः तथा अन्ये च एतादृशाः पण्डिताः प्रसिद्धाः विद्यन्ते।

मुहमद्द-ईसमाइल्खाँ-आदि-यावनिकाः वैयाकरणाः स्वकीयशोधप्रबन्धादिमाध्यमेन व्याकरणस्य विकाशे योगदानं कुर्वन्ति।

**(ख) धर्मार्जनार्थं रचितं संस्कृतव्याकरणम्:** पुनः धर्मार्जनार्थं व्याकरणाध्ययनस्याध्यापनस्य च परम्परा वैदिककालादेव प्रसिद्धा अस्ति। पाणिनीयशिक्षादिग्रन्थाः एतदर्थं विधानं प्रयच्छन्ति। इयं परम्परा अपि द्विप्रकारिका भवति। यथा -

(अ) मोक्षप्राप्त्यर्थं रचितव्याकरणपरम्परा

(आ) भगवतः गुणकीर्तनं कृत्वा रचितव्याकरणपरम्परा। एतयोः वर्णनं यथा -

**(अ) मोक्षप्राप्त्यर्थं रचितव्याकरणपरम्परा:** पाणिण्याद्याचार्याणां या व्याकरणपरम्परा सा मोक्षप्राप्त्यर्थं रचितव्याकरणपरम्परा भवति। ततः उक्तञ्च हरिणा-

> तद्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।
> पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते।। (वाक्यपदीयम्, १/१४)

एतदर्थं धर्मार्जनम् अभिलक्ष्य सम्भवतः दीक्षितादयः स्वरचितसिद्धान्तकौमुद्यादिग्रन्थेषु विविधधार्मिकोदाहरणादिमाध्यमेन भूयो भूयः भगवतः गुणकीर्त्तनं कुर्वन्ति। उदाहरणरूपेण यथा –

> शत्रूनगमयत्स्वर्गं वेदार्थं स्वानवेदयत्।
> आशयच्चामृतं देवान्वेदमध्यापयद्विधिम्।।
> आसयत्सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः।। (सिद्धान्तकौमुदी, ५४०, पा., १/४/५२)।

अत्र दीक्षितः उदाहरणव्याजेन हरेर्गुणानुस्मरणं कृतवान्। न केवलं पाणिनीयाः अपितु अपाणिनीयाः अपि वैयाकरणाः स्वकीयधर्मधारणादीनां परिप्रकाशार्थं विविधधार्मिकोदाहरणानि प्रयच्छन्ति। अनेन क्रमेण अनुभूतिस्वरूपाचार्यः यथा -

> स्वामी ते स समायातः स्वामी मे सांप्रतं गतः।
> नमस्ते भगवन्! भूयो देहि मे मोक्षमक्षयम्।।
> स्वामी वां स जहासोच्चैर्दृष्ट्वा नौ दानयाचनाम्।
> राजा वां दास्यते दानं ज्ञानं नौ मधुसूदनः।।
> देवा वामवताद्विष्णुर्नरकान्नौ जनार्दनः।
> स्वामी वो बलवान् राजा स्वामी नोऽसौ जनार्दनः।।
> नमो वो ब्रह्मविज्ञेभ्यो ज्ञानं नो दीयतां धनम्।
> सानन्दान् वः प्रपश्यामः पश्यामो नः सुदुःखिनः।।
> (सारस्वतव्याकरणम्, युष्मदस्मत्प्रक्रिया, का., १ - ४)

अनेन प्रकारेण बहवः वैयाकरणाः स्वकीयधर्मधारणायाः परिप्रकाशार्थं तथा अध्येतॄणां मङ्गलविधानार्थं विविधप्रकारकधार्मिकोदाहरणानि, धार्मिकोद्धरणानि च स्वकीयग्रन्थेषु उपस्थापितवन्तः। अनेन धर्मार्जनम् अप्रत्यक्षरूपेण तथा व्याकरणज्ञानार्जनं प्रत्यक्षरूपेण च जायते।

**(आ) भगवतः गुणकीर्तनं कृत्वा रचितव्याकरणपरम्परा:** अनेन प्रकारेण पतञ्जलि-जयादित्य-वामन-भर्तृहरि-प्रभृतयः आचार्याः स्वस्वव्याकरणग्रन्थेषु उदाहरणादि-माध्यमेन यद्यपि भूयो भूयः भगवतः गुणकीर्त्तनं कुर्वन्ति, तथापि एते व्याकरणग्रन्थाः स्वतन्त्ररूपेण धार्मिकव्याकरणरूपेण परिचिताः न भवन्ति। ततः एतदर्थं केचन पण्डिताः भगवतः गुणकीर्तनं कृत्वा नवीनव्याकरणग्रन्थान् लिखितवन्तः। अत्र एतेषु ग्रन्थेषु भगवद्भक्तेः प्राधान्यमस्ति। एतेषु ग्रन्थेषु श्रीजीवगोस्वामिनः 'हरिनामामृतव्याकरणम्' (अधुनाप्राप्तं बृहत्हरिनामामृतव्याकरणम्) सर्वश्रेष्ठं भवति। अत्र हरिभक्तिमाश्रित्य सम्पूर्णव्याकरणग्रन्थः विरचितः अस्ति। अस्मिन्सम्प्रदाये अन्येऽपि व्याकरणग्रन्थाः रचिताः आसन्। तेषु कतिपयमुख्यव्याकरणग्रन्थाः सन्ति - बलरामपञ्चाननकृतं शैवमतानुसृतं 'प्रबोधप्रकाशव्याकरणम्', वैष्णवभावाश्रितं परमानन्ददासकृतं 'चैतन्यामृतम्', वैष्णवभावाश्रितं कृष्णानन्दविद्यासागरस्य 'कृष्णलीलामृतम्', श्रीगोविन्दनाथस्य वैष्णवभावाश्रितं 'श्रीगोविन्दव्याकरणम्', श्रीवोपदेवप्रणीतं वैष्णवभावाश्रितं 'रामव्याकरणम्', उत्कलीयस्य श्रीवैजलदेवस्य रचितः वैष्णवव्याकरणग्रन्थः 'वैजलकारिका', वैष्णववैयाकरणस्य भट्टमल्लस्य 'आख्यातचन्द्रिका', रूपगोस्वामिनः 'प्रयुक्ताख्यातमञ्जरी', श्रीजीवगोस्वामिनः 'धातुसंग्रहः' इत्यादयः।

**उपसंहार:** एतादृशव्याकरणेषु नूतनवैष्णवादिशब्दाबलीनां निर्माणं प्रयोगसाधुत्वं च दृश्यते। पुनः भाषाध्ययनेऽपि साम्प्रदायिकदर्शनानामुपयोगः अनेन प्रयासेन दृश्यते। वैष्णवशैवादि- साहित्य-संस्कृति-दर्शन-परम्पराणाञ्च प्रकाशनमनेन भवति। विदुषां समक्षमेतद् समानीतं यत् एतादृशव्याकरणानामाधारभूतं पाणिनिव्याकरणमपि समेषां समीक्षकाणां दृष्टिपथं समाकर्ष्यतेतराम्। नात्र सन्देहः यदेतस्मिन्व्याकरणेऽवगाहनार्थमेतन्प्रकृतिभूतं त्रिमुनिव्याकरणं तथा

तदुत्तरवर्त्तिपाणिनीयसाहित्यज्ञानमपरिहार्यमनुसन्धेयञ्च। तज्ज्ञानं विना एतादृशभगवद्गुणकीर्तनपरकरचितव्याकरणे पाटवं न सम्भवेत्। एतत्तु सत्यं यत् पाणिन्युत्तरवर्त्ति सूत्रशैल्या निर्मितं किमपि व्याकरणं पाणिनेः वर्णनकौशलं नातिक्राम्येत्।

**सहायकग्रन्थसूची**


१. व्याकरण दर्शनेर इतिहास -गुरुपदहालदारः, संस्कृतवुक्डिपो, कोलकाता, पुनर्मुद्रणम्, जानुयारी, २००६।
२. व्याकरणशास्त्रेतिहासः - लोकमणिदंहालः, भातरीय-विद्या-प्रकाशनम्, दिल्ली, २००७।
३. शब्दशास्त्रेर इतिहास - कालीजीवनदेवशर्मा(चक्रवर्त्ती),रामकृष्णमिशन-इनस्टिटिउट्-अफ् कालचार्, गोलपार्क्, कोलकाता, प्रथमप्रकाशनम्,१९९५।
४. संस्कृत-वाङ्मय का बृहद् इतिहास (पञ्चदशखण्डः)– प्रधानसम्पादकः पद्मभूषण-आचार्य-बलदेव-उपाध्यायः, सम्पादकः प्रो. गोपाल-दत्त-पाण्डेयः, उत्तरप्रदेश-संस्कृत-संस्थानम्, लखनऊ, प्रथमसंस्करणम्, २००१।
५. संस्कृत व्याकरणशास्त्र का इतिहास, १-३ भाग - ब्रह्मदत्तजी जिज्ञासु, रामलाल कपुर ट्रष्ट,सोनिपत्, हरियाणा, संवत्, २०५१, २०३०, २०३०।
६. संस्कृतव्याकरणशास्त्रेतिहासविमर्शः- डाँ. अशोकगौडशास्त्री, भारतीयविद्यासंस्थानम्, वाराणसी, प्रथमसंस्करणम्, विक्रमसंवत्, २०५५।